अस्मिन् प्रश्नपत्रपुस्तिकायाम् 28 प्रश्नाः [खण्ड—क (20) + खण्ड—ख (4+4)] एवं 10 पृष्ठाः सन्ति।

Roll No.
अनुक्रमांक

Code No.
कोड नं० **49/SS/O/S**

**Set/सेट A**

# संस्कृतम्

## (309)

Day and Date of Examination ..............................................................................

Signature of Invigilators 1. ....................................................

2. ....................................................

***निर्देशाः —***

1. परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व-अनुक्रमाङ्कम् अवश्यं लिखतु।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम्।
3. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
4. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कोड संख्या 49/SS/O/S, सेट A अवश्यमेव लेखनीया।



www.cbseportal.com

Download From: http://cbseportal.com

# संस्कृतम्

# (309)

समयः —होरात्रयम् ] [ पूर्णाङ्काः —100

**निर्देशाः —** (i) अस्मिन् प्रश्नपत्रे **द्वौ** खण्डौ स्तः। खण्ड—क (केन्द्रिक पाठ्यक्रमः), खण्ड—ख (वैकल्पिक–I एवं वैकल्पिक–II) स्तः।

(ii) खण्ड—क अनिवार्यः। अस्मिन् खण्डे 20 प्रश्नाः सन्ति।

(iii) खण्ड—ख **एकः** एव वैकल्पिकः समाधेयः।

(iv) खण्ड—क कृते *85* अङ्काः, खण्ड—ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः। अस्य कृते *15* अङ्काः निर्धारिताः।

## खण्ड—क

## केन्द्रिक पाठ्यक्रमः

**1.** अधोलिखितेषु कस्यचि**देकस्य** पाठस्य सारं षड्वाक्येषु लिखत— 6

(क) परार्थे आत्मोत्सर्गः

(ख) अतिलोभः न कर्त्तव्यः

(ग) राजते खलु कन्याकुमारी

**2.** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत— 1×4=4

तस्मिन् समये राक्षसः समागत्य प्रसन्नवदनं पुरुषं दृष्ट्वा विस्मितस्तं वदति, "भो महासत्त्व, अत्र शिलायां प्रतिदिनं यः उपविशति स मदागमनात् पूर्वमेव म्रियते। त्वं पुनः महाधैर्यसम्पन्नः प्रसन्नवदनः दृश्यसे। यस्य मरणकालः समायातः तस्येन्द्रियाणि ग्लानिं प्राप्नुवन्ति। त्वं पुनरधिकां कान्तिं प्राप्य प्रहससि।"

**प्रश्नाः**

(क) राक्षसः कीदृशं पुरुषं दृष्ट्वा विस्मितः?

(ख) राक्षसस्य आगमनात् पूर्वमेव पुरुषस्य किं भवति?

(ग) वध्यशिलायामुपविष्टः पुरुषः कीदृशः आसीत्?

(घ) कस्य इन्द्रियाणि ग्लानिं प्राप्नुवन्ति?

Download From: http://cbseportal.com

**3.** अधोलिखितानां प्रश्नानाम् उत्तरं लिखत— 1×4=4

(क) कति समुद्राः कन्याकुमार्याः पदतलं निरन्तरं प्रक्षालयन्ति?

(ख) कस्मिन् स्थाने स्नानं महत् पुण्यदायकं मन्यते?

(ग) दक्षिणदेशं कुमार्यै कः दत्तवान्?

(घ) विवेकानन्द-शिलास्मारकस्य निर्माणं कः अकारयत्?

**4.** (क) प्रश्नान् उत्तरत— 1×2=2

*(i)* छिन्ननासिकायाः प्रत्यारोपणार्थं शल्यचिकित्सा कुत्र वर्णिता?

*(ii)* पाइथागोरस-सिद्धान्तः कुत्र वर्णितः?

(ख) रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत— 1×2=2

*(i)* नूनम् अग्रे स्वर्णं भविष्यति।

*(ii)* सोऽपि प्रहर्षितः यावत् खनति तावत् विस्मयोत्फुल्ल-लोचनः जातः।

**5.** एतत् कथनं कः कं प्रति कथयति? 2

(क) ब्रह्मन्, न खलु साधुसेवितोऽयं पन्थाः येनासि प्रवृत्तः।

(ख) वत्से सरस्वति, विषादं मा गाः। एषा त्वामनुयास्यति सावित्री।

**6.** अधोलिखितपद्यांशद्वयं पठित्वा प्रश्नान् उत्तरत— 2×2=4

(क) आमेखलं संचरतां घनानां छायामधः सानुगतां निषेव्य।
उद्वेजिताः वृष्टिभिराश्रयन्ते श्रृंगाणि यस्यातपवन्ति सिद्धाः॥

**प्रश्नद्वयम्**

*(i)* हिमालये वृष्टिभिः उद्वेजिताः के भवन्ति?

*(ii)* सिद्धाः घनानां छायां कुत्र सेवन्ते?

Download From: http://cbseportal.com

(ख) कश्चिदेव हिते भर्तुर्दृश्यते न परात्मनोः।
कार्यापेक्षाः हि वर्तन्ते भावस्निग्धाः सुदुर्लभाः॥

**प्रश्नद्वयम्**

*(i)* भर्तुः हिते कः दृश्यते?

*(ii)* कीदृशाः जनाः सुदुर्लभाः?

**7.** अधोलिखितयोः अन्वयद्वयोः रिक्तस्थानपूर्तिं कुरुत— 2

(क) तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥

अन्वयः —

तृणानि, भूमिः, ———, चतुर्थी च सूनृता वाक्

एतानि अपि ——— गेहे कदाचन न उच्छिद्यन्ते।

(ख) अनेकसुशिरं वाद्यं कान्तं च ऋषिसंज्ञितम्।
चक्रिणा च सदाराध्यं यो जानाति स पण्डितः॥

अन्वयः —

अनेकसुशिरं वाद्यं ——— च ऋषिसंज्ञितम्,

चक्रिणा च सदा आराध्यं यः ——— स पण्डितः।

**8.** अधोलिखितपद्यांशद्वयस्य भावार्थयोः रिक्तस्थानानि पूरयत— 2

(क) सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।

भावार्थः —

ये संतोषरूपिणा अमृतेन तृप्ताः ते एव ——— प्राप्नुवन्ति।

(ख) निद्रालाभः सुखं च स्यात् मूर्ध्नि तैलनिषेवणात्।

भावार्थः —

शिरसि तैलाभ्यंगनेन सुखपूर्वकं ——— भवति।

Download From: http://cbseportal.com

**9.** पद्यांशं 'अ' स्तम्भात् 'ब' स्तम्भेन सह मेलयत— 2

| स्तम्भ—अ | | स्तम्भ—ब | |
|---|---|---|---|
| *(i)* | को वर्धते | (क) | यत् सुखं शान्तचेतसाम् |
| *(ii)* | सन्तोषामृततृप्तानां | (ख) | ब्रूते यश्चानृतं शश्वत् |
| *(iii)* | को न प्रत्येतव्यः | (ग) | विनीतः |
| *(iv)* | तस्य नित्यं क्षरत्येतत् | (घ) | पयोदधि घृतं मधु |

**10.** 'हृदय-परिवर्तनम्' इति नाटकस्य सारांशं षड्वाक्येषु लिखत। सहायतायै बिन्दवः दत्ताः — 6

**बिन्दवः**

अंगुलिमालकः, लुण्ठकः, नवनवतिः, अंगुलीनां मालां धारयति, शतांगुलीनाम्, धारयितुम् एकदा बुद्धम्, आहूय, मालायां शतमा अंगुली तस्य अयाचत्, बुद्धः, त्वं कदा विरतः, प्राणिवधं त्यज, अहिंसा परमो धर्मः।

**11.** (क) अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत— 1×2=2

( सहसा वंशीध्वनिः गुञ्जति )

सर्वे यक्षाः : कुतोऽस्मिन् घोरे विपिने संगीतकम्? कोऽयं वंशीवादकः? एत, एत पश्यामः। ध्वनिम् अनुसरन्तो यामः।

प्रथमः : तर्कयामि, नातिदूरे कश्चन मुरलीं वादयति।

द्वितीयः : अहो, ज्ञायतेऽधुना यत्रैता गावो विचरन्ति, तत्समीपे एव तेन मुरलीवादकेन भवितव्यम्।

तृतीय यक्षः : पश्यत पश्यत, वटतरुतले निषण्णः कश्चिद् युवा वंशीं ध्वनति। तमुपसर्पामः।

**प्रश्नाः**

*(i)* यक्षाः सहसा कस्य ध्वनिम् अश्रृण्वन्?

*(ii)* युवा वंशीं कुत्र ध्वनति स्म?

Download From: http://cbseportal.com



www.cbseportal.com

(ख) अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत— 1×2=2

विस्तीर्णलोहितमुखः परिवृत्तनेत्रो
भग्नांसकण्ठकटिजानुकरोरुजंघः।
विच्छिन्नहारपतिताङ्गदलम्बसूत्रो,
वज्रप्रभग्नशिखरः पतितो यथाद्रिः॥

**प्रश्नाः**

(i) विस्तीर्णलोहितमुखः कः आसीत्?

(ii) कंसस्य शरीरं किमिव पतितं जातम्?

**12.** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्त-प्रश्नान् उत्तरत—

(क) **गद्यांशः**

पर्यावरणस्य सर्वतः व्याप्तं प्रकृष्टं तत्त्वं वायुमंडलम्। एतेन गंधः प्रसरति। वायुः सर्वत्र पवित्रं वायुमंडलं जीवनचक्रं च प्रेरयति। अद्यत्वे निर्माणशालाभ्यो निर्गतधूमैः वातावरणं विषाक्तं भवति।

**प्रश्नाः**

(i) पर्यावरणस्य सर्वतः व्याप्तं तत्त्वं किम्? एतेन किं प्रसरति? 2

(ii) वायुः किं प्रेरयति? 2

(iii) वातावरणं कैः विषाक्तं भवति? 1

(ख) **पद्यांशः**

अहिंस्रः सर्वभूतेषु सत्यवाक् सुदृढव्रतः।
स चकार यथाकालमाहारं पतितैः फलैः॥

**प्रश्नाः**

(i) अहिंस्रः कः आसीत्? 1

(ii) सः कीदृशं वाक्यम् अब्रवीत्? 2

(iii) सः कैः आहारम् अकरोत्? 2

**13.** मञ्जूषापदसहायतया 'उद्यानम्' इति विषयमधिकृत्य दशवाक्यानि लिखत। 1×10=10

**मञ्जूषा**

उद्यानम्, बालाः, वृक्षाः, भ्रमणाय, क्रीडायै, प्रातः, सायं, पक्षी, पुष्पम्, कन्दुकम्, सुन्दरवेला, स्वास्थ्यवर्धनम्।

Download From: http://cbseportal.com

**14.** भवान् रमेशः। भवताम् उपनगरे पत्रालयः नास्ति। तदर्थं पत्रालय-महाप्रबन्धकं प्रति पत्रमेकं लिखतु। 6

**15.** भवतः नाम दिनेशः। ग्रीष्मावकाशे पर्वतीयक्षेत्रयात्रामुपलक्ष्य मित्राय संवादं लिखत। **चत्वारि** वाक्यानि लिखत। 1×4=4

**16.** रेखाङ्कितपदे सन्धिच्छेदं कुरुत— 1

(क) परायणं ज्योतिरेकं प्रसन्नम्।

(ख) शृंगाणि यस्यातपवन्ति सिद्धाः।

**17.** (क) रेखाङ्कितपदे का विभक्तिः किं च मूलपदम्? 2

नित्यं स्नेहार्द्रशिरसः शिरःशूलं न जायते।

(ख) रेखाङ्कितपद**द्वयं** लट्लकारे परिवर्त्य लिखत— 2

सम्मुखम् आयातं जनं राक्षसः अभक्षयत्।
राजा भोजः पुत्तलिकाम् अवदत्।

**18.** समुचितपदनिर्माणं कृत्वा रिक्तस्थानं पूरयत— 1×4=4

(क) कृष्णः ——— दुष्टं कंसं हतवान्। (बाल्यकाल + उचितविभक्ति)

(ख) देवक्याः विवाहः ——— सह अभवत्। (वसुदेव + उचितविभक्ति)

(ग) सेवकः ——— वदति। (उप + विश् + ल्यप्)

(घ) कंसः षड्यंत्रैः कृष्णं बलरामं च ——— प्रयासं करोति। (हन् + तुमुन्)

www.cbseportal.com
Download From: http://cbseportal.com

**19.** यथानिर्दिष्टं कुरुत— 1×4=4

(क) मातापितरौ पूज्यौ भवतः। (रेखाङ्कितपदस्य विग्रहं कुरुत)

(ख) सर्वे तत्र समागताः। (प्रत्ययं चिनुत)

(ग) समुद्राः पदतलं क्षालयन्ति निरन्तरम्। (अव्ययं चिनुत)

(घ) राजा स्वनगरीम् अगच्छत्। (कर्मवाच्ये परिवर्तनं कुरुत)

**20.** अधोलिखितवाक्ये **एकम्** अव्ययम् **एकम्** उपसर्गं च चित्वा लिखत— 2

(क) तौ गुरुं पितरं च प्रणमतः।

(ख) बालकौ विद्यालयं प्रविशतः।

www.cbseportal.com

Download From: http://cbseportal.com

## वैकल्पिक–I

## ( संस्कृतं संस्कृतिश्च )

**21.** अधोलिखितकाव्यानां तेषां लेखकैः सह मेलनं कृत्वा लिखत— 2

| 'अ' | | 'ब' | |
|---|---|---|---|
| *(i)* | पाथेयशतकम् | (क) | गजाननबालकृष्णपलसुले |
| *(ii)* | समानमस्तु वो मनः | (ख) | रामकरणशर्मा |
| *(iii)* | विवेकानन्दविजयम् | (ग) | हरिनारायणदीक्षित |
| *(iv)* | मेनकाविश्वामित्रम् | (घ) | श्रीधरभास्करवर्णेकर |

**22.** अधोलिखितप्रश्नान् उत्तरत—

(क) अधोलिखित-संख्यानां कृते संस्कृतपदानि लिखत— 2

$10^{22}$, $10^{32}$, $10^{37}$, $10^{55}$

(ख) 'अयुतम्' इत्यस्य प्रयोगः अनेकशः कस्मिन् ग्रंथे प्रयुक्तः? कस्मिन् अर्थे च अस्य प्रयोगः? 2

(ग) लक्षगुणनोत्तरप्रणाल्याः सुन्दरम् उदाहरणं कस्मिन् ग्रंथे प्राप्यते? 1

(घ) कृषिशास्त्रस्य विश्वकोशः कः ग्रंथः कथ्यते? तस्य ग्रंथस्य रचयिता कः अस्ति? 2

**23.** भारतीय-संविधानस्य कस्यां अनुसूच्यां संस्कृतस्य मान्यता उल्लिखिता? 2

**24.** (क) ब्रह्मचर्याश्रमस्य अन्ते कः संस्कारः भवति? 1

(ख) संस्काराः कति संख्याकाः भवन्ति? 1

(ग) ब्रह्मचर्याश्रमानन्तरं युवा कस्मिन् आश्रमे प्रविशति? तत्र प्रवेष्टुं कः संस्कारः क्रियते? 2

Download From: http://cbseportal.com

# वैकल्पिक–II

## ( प्रयोजनमूलकसंस्कृतम् )

**21.** अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत— 1×4=4

(क) सेनायां ——— संस्कृतस्नातकः नियुज्यते।

(ख) आदिशंकराचार्यः इति ——— दूरदर्शने प्रसारितम्।

(ग) व्यावसायिकदृष्ट्या ——— विशिष्टं महत्त्वम् अस्ति।

(घ) सूक्तयः प्रेरणाप्रदाः ——— च भवन्ति।

**22.** अधोलिखितान् प्रश्नान् उत्तरत— 1×4=4

(क) दूरदर्शने संस्कृतवार्ताप्रसारणं प्रातःकाले कतिवादने भवति?

(ख) आकाशवाणी-दूरदर्शनयोः वार्ता-स्रोतांसि कतिविधानि भवन्ति?

(ग) वार्ताप्रवाचकस्य कीदृशं परीक्षणं विधीयते?

(घ) आकाशवाणीभवने अनेके सम्पादकाः कुत्र उपविशन्ति?

**23.** संस्कृते प्रकाशिता 'चन्दा मामा' इति पत्रिका मासिकी अस्ति साप्ताहिकी वा? 2

**24.** (क) पत्रपत्रिकाणां मुद्रणे, पठने, बोधने च सुविधायै किं कार्यं महत्त्वपूर्णं मन्यते? 1

(ख) 'संस्कृतमञ्जरी' आवधिकदृष्ट्या कीदृशी पत्रिका अस्ति? 1

(ग) पत्रपत्रिकाणां प्रकाशनाय केषां नियमानां पालनं सम्पादकैः कर्त्तव्यम्? 1

(घ) त्रुटिशोधने प्रयुक्तम् अधोलिखित-चिह्नद्वयं तयोः अभिप्रायेण सह मेलयत— 2

| 'अ' | 'ब' |
|---|---|
| ( – ) | विवरणचिह्नम् |
| ( : ) | योजकचिह्नम् |

★ ★ ★

Download From: http://cbseportal.com